योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १०७

सप्ताधिकशततमः सर्गः १०७

श्रीवसिष्ठ उवाच ।

अचेत्यचिन्मयं विश्वं विष्वगाभाति चिन्नभः ।

अत्र चिच्चेतनं चेदं चेत्यमप्येवमात्मकम् ।। १

अतो जीवन्नपि मृत इव सर्वोऽवतिष्ठते ।

असावहं च त्वं चेति जीवन्तोऽपि मृता इव ।। २

काष्ठमौनमृता एव व्यवहारगता अपि ।

खगमा एव वा सर्वे भावाः स्थावरजङ्गमाः ।। ३

आकाशकाचकच्यात्म यदिदं किंचिदाततम् ।

न किंचिदेव तद्विद्धि किंचिद्व्योम्नि कुतो भवेत् ।। ४

केशोण्ड्रकनदीवाहधूमालीमौक्तिकादिवत् ।

यत्नं कचति तत्रास्ति नानुभूतेऽपि वस्तुता ।। ५

तथैवास्मिञ्जगन्नाम्नि चिद्व्योम्नि कचने चिते ।

अनुभूतेऽपि निःशून्ये कास्थास्थाभावकश्च कः ।। ६

चिद्वालकल्पनाजाले शून्यात्मनि निरर्थके ।

अवस्तुभूते पृथ्व्यादौ भ्रान्तिमात्राम्बरोदये ।। ७

किमास्था बालका ब्रूत ममेदमहमित्यलम् ।

आ ज्ञातं रमते बालसंकल्पे बाल एव च ।। ८

पृथ्व्याद्यसद्विचारैर्वा व्यर्थं यास्यति जीवितम् ।

किंचिच्च न ज्ञास्यति भोराकाशक्षालनोद्यतः ।। ९

सहकार्यादिपूर्वाणां कारणानामभावतः ।

यदादावेव नोत्पन्नं तन्नामाद्य भवेत्कुतः ।। १०

अजातेनासतार्थेन खेन व्यवहरन्ति ये ।

मूढा मृतमजातं वा तनयं पालयन्ति ते ।। ११

कुतः पृथ्व्यादयः केन के नाम कथमुत्थिताः ।

चिद्व्योमेत्थमिदं शान्तं प्रकचत्यात्मनात्मनि ।। १२

कार्यकारणकालादिकल्पनाकुलचेतसाम् ।

एवं पृथ्व्यादयः सन्ति तैर्बालैरलमस्तु नः ।। १३

अपृथ्व्यादि जगन्नाम सपृथ्व्यादि च खात्मकम् ।

कचतीत्थं नभोरूपं स्वप्नादिष्विव चिन्मणिः ।। १८

अङ्गं यदेतस्य चिदम्बरस्य

निराकृति स्वानुभवानुमानम् ।

तदेतदाभाति महीतलादि-

रूपेण वेद्येतिकृताभिधानम् ।। १५

०इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० नि० उत्तरार्धे अविद्याभावप्रतिपादनं नाम सप्ताधिकशततमः सर्गः ।।१०७।।